कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M182 विषय उपनिषद
नाव. स्कंधोपनिषद . [illegible]
लेखक/लिपीकार —
पृष्ठ 2 काळ — पूर्ण/अपूर्ण

हरिः ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टु
वांसस्तनूभिर्व्यशेम देवहितं यदायुः ॥ स्वस्तिन इंद्रो वृद्धश्रवाः स्वस्तिः पूषा
विश्ववेदाः ॥ स्वस्तिनस्ताक्ष्यो अरिष्टनेमिः स्वस्तिनो बृहस्पतिर्दधातु ॥ ॐ शां
तिः शांतिः शांतिः ओं अच्युतोस्मि महादेव तव कारुण्यलेशतः ॥ विज्ञानघ
न एवास्मि शिवोस्मि किमतः परं ॥ १ ॥ न निजं निजवद्भाति अंतःकरणजृंभ
णात् ॥ अंतःकरणनाशे तु संविन्मात्रस्थितो हरिः ॥ २ ॥ संविन्मात्रस्थित
श्चाहं अजोस्मि किमतः परं ॥ व्यतिरिक्तं जडं सर्वं स्वप्नवच्च विनश्यति ॥ ३ ॥
चिज्जडानां तु यो द्रष्टा सोच्युतो ज्ञानविग्रहः ॥ स एव हि महादेव स एव हि

स्कं० वहि महान्हरिः ॥४॥ स एवऽयोतिषांऽयातिः स एव परमेश्वरः ॥ स एव हि परं ब्र नि०
ह्म ब्रह्मैवाहं न संशयः ॥५॥ तुषेण बद्धो व्रीहिः स्यात्तुषाभावेन तंडुलः ॥ एवं बद्ध वं-
स्तथा जीवः कर्मनाशे सदाशिवः ॥६॥ जीवः शिवः शिवो जीवः स जीवः के-
३
वलः शिवः ॥ पाशबद्धस्तथा जीवः पाशमुक्तः सदाशिवः ॥७॥ शिवाय वि-
ष्णुरूपाय शिवरूपाय विष्णवे ॥ शिवस्य हृदयं विष्णुर्विष्णोश्च हृदयं शिवः ॥८॥
यथा शिवमयो विष्णुरेवं विष्णुमयः शिवः ॥ यथांतरं न पश्यामि तथा मे स्व-
स्तिरायुषि ॥९॥ अचिंत्यमव्यक्तमनंतमव्ययं चिदात्मकं ब्रह्म निरंजनं ॥३॥
ततः ॥ तद्विष्णोः परमं पदं सदा पश्यंति सूरयः ॥ दिवीव चक्षुराततं ॥१०

तद्विप्रासो विपन्यवो जागृवांसः समिंधते ॥ विष्णोर्यत्परमं पदं ॥ विष्णो-
र्यत्परमं पदमित्युपनिषत् ॥११॥ ॐ भद्रं कर्णेभिरिति शांतिः शांतिः शांतिः
इति स्कंधोपनिषत्समाप्ता ॥ शके ३८७७ अधिक ज्येष्ठवद्य ३२ सौम्यवासर